मरुता ग्रहणीमभि नीयते"। ग्रहणीलक्षणमाह "षष्ठी-पित्तधरा नाम पाकला परिकीर्त्तिता। आमपक्वाशयान्तःस्था ग्रहणीत्यभिधीयते"। पित्तधरा पाचकाख्यं पित्तं तदग्न्यधिष्ठानं तद्धारयति। तत्र ग्रहण्यामामाशयपक्वाशयमध्यवर्त्तिपाचकाख्यपित्ताधिष्ठानेनाग्निनाहारः पच्यते स कटुश्च भवति। तथा च "ग्रहण्याम्पच्यते कोष्ठवह्निना जायते कटुरिति"। अयमर्थः। आहारो ग्रहण्यां कोष्ठवह्निना ग्रहणीस्थितपाचकपित्तेन वह्निना पच्यते पच्यमानः स ग्रहणीस्थितस्य कटुरसस्य पित्तस्य योगात्कटुर्भवति। एतदाहारपाके विशेषमाह। "शरीरं पाञ्चभौतिकम्" तत्र पञ्चसु भूतेषु पञ्चाग्नयः तिष्ठन्ति। उक्तं च चरकेण। "भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः। पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यनु"। अत्रोष्मपदेनाग्निरुच्यते आहारोऽपि पाञ्चभौतिकः तत्र पाचकपित्तस्थेनाग्निनो त्तेजितेन शरीरवर्त्तिभूभागाग्निनाहारवर्त्तिभूभागः पच्यते पक्वोभूभागः स्वकीयान् गुणानभिवर्द्धयति एवं जलादिभागा अपि पच्यन्ते। तथा च सुश्रुते "पञ्चभूतात्मके देहे आहारः पाञ्चभौतिकः। विपक्वः पञ्चधा सम्यक्गुणान् स्वानभिवर्द्धयेदिति"। गुणशब्देनात्र गुणिनः पृथिव्यादय उच्यन्ते तेन गुणान् शरीरवर्त्तिनः पार्थिवादीन् भागानभिवर्द्धयेदित्यर्थः। एवमहोरात्रेण पक्वाहारो मिष्टश्च कटुश्च मधुरोभवति अम्लस्त्वम्लोभवति। कटुस्तिक्तः कषायश्च कटुर्भवति उक्तञ्च "मिष्टःकटुश्च मधुरमम्लोऽम्लं पच्यते रसः। कटुतिक्तकषायाणां विपाको जायते कटुरिति" एवं विपक्वस्याहारस्य सारो निगदितोरसः शेषोग्रहणीस्थोमलद्रवः। मलद्रवस्य जलभागः शिराभिर्वस्तिन्नीतो-मूत्रम्भवति। उक्तञ्च "आहारस्य रसःसारः सारहीनो-मलद्रवः। शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात्। शेषं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते। समानवायुनानीतं तत्तिष्ठति मलाशये"। तत्र मलाशयेनापानवायुना प्रेरितं मूत्रं मेढ्रभगमार्गेण, पुरीषं गुदमार्गेण शरीराद्बहिर्याति उक्तञ्च "मूत्रं ह्युपस्थमार्गेण पुरीषं गुदमार्गतः। अपानवायुनाक्षिप्तं बहिर्याति शरीरतः"। उपस्थः शिश्नोभगश्च। रसस्तु समानवायुना प्रेरितोधमनीमार्गेण शरीरारम्भकस्य रसस्य स्थानं हृदयं गत्वा तेन सहमिश्रितोभवति उक्तञ्च

"रसस्तु हृदयं याति समानमरुतेरितः। स तु व्यानेन पुविक्षिप्तः सर्व्वान्धातून् विवर्द्धयेत्। केदारेषु यथा कुल्याः शान्ति विविधौषधीः तथा कलेवरे धातून् सर्वान्वर्द्धयते रसः"

रसस्तु तत्र तत्र त्रिधा विभिद्यते। उक्तं च चरके "स्थूला एवं मलभेदैस्तत्तत्र त्रिधा रसः। स्वंस्थूलेऽंशः परं सूक्ष्मस्तन्मलो याति तन्मलम्"। अयमर्थः स्थूलेऽंशः स्वंयाति। यथास्थितं तिष्ठति सूक्ष्मस्त्वंशःपरं द्वितीयं धातुं याति-तन्मलः रसादिमलस्तन्मलं शरीरारम्भकं तत्तद्धातुमलं यातीत्यर्थः यथा लौकिकाग्निनेक्षुरसः पच्यते तथा शरीरारम्भकस्य रसस्य अग्निनाहाररसः पच्यते पच्यमानः स पञ्चाहोरात्रात्सार्द्धदण्डमेकं च यावत्प्राक्तनरसधातावेव तिष्ठते उक्तञ्च सुश्रुते "स खलु रसस्त्रीणि त्रीणि कलासहस्राणि पञ्चदशकला एकैकस्मिन्धातावेव तिष्ठति" इति। अत्र कलानां विंशतिः मुहूर्त्तः स च दण्डद्वयात्मकः तथा च भोजः "धातौ रसादौ मज्जान्ते प्रत्येकं क्रमतोरसः। अहोरात्रात्स्वयंपञ्च सार्द्धं दण्डं च तिष्ठति"। प्रत्येकम् एकस्मिन्नेकस्मिन्नित्यर्थः ततो यथा पच्यमानादिक्षुरसान्मलोनिर्गच्छति। तथा पच्यमानादाहाररसान्मलो निर्गच्छति सः कफः उक्तञ्च सुश्रुते "कफपित्तमलाः खेषु प्रस्वेदोनखरोम च नेत्रविट्चक्षुषःस्नेहोधातूनां क्रमशोमलाः। खेषुमलः कर्णादिस्रोतोमलः। स च कफः प्राणानिलप्रेरितोधमनीमार्गेण शरीरारम्भकं क्लेदनाख्यं कफं गत्वा पुष्णाति। ततः सारभूतस्याहाररसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मोभागः शरीरारम्भकं रसं पोषयति सकलशरीराधिष्ठानेन व्यानवायुना प्रेरितोधमनीभिः सञ्चरन् पोषणस्नेहनजठरानलोष्मकृतसन्तापनिवारणादिभिर्गुणैः सकलं पुष्णाति शरीरम् ततः स्थूलोभागः प्राणवायुना प्रेरितोधमनीमार्गेण शरीरारम्भकस्य रक्तस्य स्थानं गत्वा यकृत्प्लीहरूपङ्गत्वा तेन सह मिश्रितो भवति। ततः प्राक्तनरक्तस्याग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डञ्च यावत्प्राक्तनरक्तधातावेव तिष्ठति ततो यथाग्निना पुनःपुनः पच्यमानादिक्षुविकाराद्वारंवारं मलं निर्गच्छति। तथा पुनःपुनः पच्यमानादाहाररसात्प्रतिवारं मलं निर्गच्छति तत्र रक्ताग्निनापच्यमानान्मलं पित्तं निर्गच्छति। तच्च पित्तं समानवायुना प्रेरितं धमनीमार्गेण शरीरारम्भकं पाचकाख्यं पित्तं गत्वा पुष्णाति। ततः सारभूतस्याहाररसस्य द्वौ भागौ भवतः। स्थूलः सूक्ष्मश्च। तत्र सूक्ष्मोभागोरञ्जकाख्येन पित्तेन रक्तीकृतः शरीरारम्भकं रक्तं पोषयन् व्यानवायुना प्रेरितो धमनीभिः सञ्चरन् सकलशरीरगतानि रुधिराणि पुष्णाति। ततः स्थूलोभागो व्यानवायुना-